॥ अथ लक्ष्मीविभक्तिवैभवम् ॥

प्रथमाविभक्तिः --
(भुजङ्गप्रयातम्)

सुरेज्या विशाला सुभद्रा मनोज्ञा
रमा श्रीपदा मन्त्ररूपा विवन्द्या ।
नवा नन्दिनी विष्णुपत्नी सुनेत्रा
सदा भावितव्या सुहर्षप्रदा मा ॥

सम्बोधनम् --
(तोटकम्)

अयि! तापनिवारिणि! वेदनुते!
कमलासिनि! दुग्धसमुद्रसुते!
जगदम्ब! सुरेश्वरि! देविवरे!
परिपालय मां जनमोहिनि! मे!

द्वितीयाविभक्तिः --
(स्रग्विणी)

अच्युतां शंकरां पद्मनेत्रां सुमां
श्रीकरां सागरां विश्वरूपां मुदाम् ।
सुप्रभां भार्गवीं सर्वमाङ्गल्यदां
संनमाम्युत्तमां श्रेयसीं वल्लभाम् ॥

तृतीयाविभक्तिः --
(द्रुतविलम्बितम्)

जयदया सुरवन्दितया जयी
सुभगया सुधया च धनाधिपः ।
नयदया वरदप्रियया वरः
सततभक्तिनिमग्नजनः सदा ॥

चतुर्थीविभक्तिः -- (वैश्वदेवी)

कल्याण्यै दात्र्यै सज्जनामोदनायै
भूलक्ष्म्यै मात्रे क्षीरवार्युद्भवायै |
सूक्ष्मायै मायै शुद्धगीतप्रियायै
वन्द्यायै देव्यै चञ्चलायै नमस्ते ||

पञ्चमीविभक्तिः - (वंशस्थम्)

न वै परा मातृसमा महाश्रया
न वै वरा धान्यकरी धनश्रियाः |
न वेद्मि चान्यां गरुडध्वजस्त्रिया
भयात्खलान्मूढजनाच्च पाहि माम् ||

षष्ठीविभक्तिः - (कुसुमविचित्रा)

सरसिजदेव्याः सुजनहिताया
मधुरिपुपत्न्या ह्यमृतपरायाः |
ऋतुजनिकायास्तिमितमनस्याः
जलधिभवाया ह्यहमपि दासः ||

सप्तमीविभक्तिः --
(मणिमाला)

मायां सुषमायां देव्यां विमलायां
भूत्यां जनिकायां तृप्त्यां बलदायाम् |
गुर्व्यां हरिपत्न्यां गौण्यां वरलक्ष्म्यां
भक्तिर्मम जैत्र्यां नीत्यां कमलायाम् ||